अध्याय :-४६ Chapter-46

नारद उवाच ।।[१]
बहूदकस्य कुंडस्य तीरस्थं लिंगमुत्तमम् ।।
कपिलेश्वरमभ्यर्च्य नंदभद्रस्ततः सुधीः ।। १

प्रणम्य चाग्रतस्तस्थौ प्रबद्धकर संपुटः ।।
संसारचरितैः किंचिदुःखी गाथां व्यगायत[२] ।। २

स्त्रष्टारमस्य जगतश्चेत्पश्यामि सदा शिवम् ।।
नानापृच्छाभिरथ तं कूर्यां नाथं विलज्जितम् ।। ३

अपूर्यमाण तव किं जगत्संसृजनं विना ।।
निरीह बहुधा यत्ते सृष्टं भार्गववज्जगत् ।। ४

सचेतनेन शुद्धेन श्रगादिर हितेन च ।।
अथ कस्मादात्म सदृशं न सृष्टं निर्मितं जडम् ।। ५

निर्वैरेण समेनाथ सुख दुःखै भवाभवैः ।।
ब्रह्मादिकीट पर्यन्तं किमेवं क्लिश्यते जगत् ।। ६

कांश्चित्स्वर्गेथ नरके पातयंस्तवं सदाशिव ।।
[३]किं फलं समवाप्नोषि किमेवं कुरुषे वदा ।। ७

---

१ अ. श्री नारद ।। ब. श्री नारद उ० ।।
२ ब. ते
३ ब. विफलं

इष्टैः पुत्रादिभिर्नाथ वियुक्ता मानवा ह्यमी ।।
क्रंदंति करुणासार किं घृणापि भवेन्न ते[१] ।। ८

अतीव नोचितं सर्वमेतदीश्वर सर्वथा ।।
यत्ते भक्ताः समं पापैर्मज्जंति दुःखसागरे ।। ९

एवं विधेन संसार चारित्रेण विमोहिताः[२] ।।
स्थानांतरं न यास्यामि भोक्ष्ये पास्यामि नोदकम् ।। १०

मरणांतमेव[३] यास्यामि स्थास्ये संचिंतयन्नदः ।।
स एवं विमृशन्नेव नंदभद्रः स्वयं स्थितः ।। ११

ततश्चतुर्थे दिवसे बहूदक तटे शुभे[४] ।।
कश्चिद्बालः सप्तवर्षः पीडापीडित आययौ ।। १२

कृशोतीव गलत्कुष्ठी प्रमुह्यंश्च पदेपदे ।।
नंदभद्रमुवाचेदं कृच्छ्रात्संस्तभ्य बालकः ।। १३

अहो सुरूप सर्वांग कस्माद्दुःखी भवानपि ।।
ततोस्य कारणं सर्वं व्याचष्ट नंदभद्रकः ।। १४

---

१ ब. 'रे'
२ अ. ता
३ अ. मरणं तमेव
४ अ. शुभे

श्रुत्वा तत्कारणं सर्वं बालो दीनमना ब्रवीत् ।।
अहो हा कष्टमत्युग्रं बुधानां मदबुद्धिता ।। १५

संपूर्णेद्रिय गात्रा यन्मर्तुमिच्छंति वै वृथा ।।
मुहूर्तादयत्र खट्वांगो मोक्षमार्गमुपागतः ।। १६

तदहो भारतं खंडं सत्यायुपि त्यजेद्धि कः ।।
अहमेवद्रढो मन्ये पितृभ्यां यो विवर्जितः ।। १७

अशक्तश्चलितुं वापि मर्तुमिच्छामि [1]नापि च ।।
सर्वे लाभाः सातिमाना इति सत्यावत श्रुतिः ।। १८

संतोषोऽप्युचितस्तुभ्यं देहं यस्य द्रढं त्विदम् ।।
शरीरं नीरुजं चेन्मे भवेदपि कथंचन ।। १९

क्षणे क्षणे च तत्कुर्या भुज्यते यद्युगे युगे ।।
इंद्रियाणि वशे यस्य शरीरं च द्रढं भवेत् ।। २०

सोऽप्यन्यदिच्छते चेच्च कोऽन्यस्तस्माद चेतनः ।।
शोकस्थान सहस्त्राणि हर्षस्थान शतानि च ।। २१

---

१ ब. वा पुनः ।। इति स्यात् ।

दिवसे दिवसे मूढमा विशंति न पंडितम् ॥
न हि ज्ञान विरुद्धेषु ब्रह्मपायेषु कर्मसु ॥ २२

मूलधातिषु सज्जते बुद्धिमंतो भवद्विधाः ॥
अष्टांगां बुद्धिमाहुर्या सर्वाश्रेयोविधातिनीम् ॥ २३

श्रुतिस्मृत्य विरुद्धा सा बुद्धिस्त्वप्यस्ति निर्मला ॥
अथ कृच्छ्रेषु दुर्गेषु व्यापत्सु स्वजनस्य च ॥ २४

शारीरमानसैर्दुःखैर्न सीदंति भवद्विधाः ॥
नाप्राप्यमभिवांछंति नष्टं नेच्छंति शोचितुम्[१] ॥ २५

आपत्सु च न मुह्यंति नराः पंडितबुद्धयः ॥
मनोदेहसमुत्थाभ्यां दुःखाभ्यामर्पितं जगत् ॥ २६

तयोर्व्यास समासाभ्यां शमोपायमिमं शृणु[२] ॥
व्याधेर निष्टसं स्पर्शाच्छ्रमादिष्ट विसर्जनात् ॥ २७

चतुर्भिः कारणैर्दुःखं शारीरं मानसं च यत् ॥
मानसं चाप्यप्रियस्य संयोगः प्रियवर्जनम् ॥ २८

---

१ ब. शोचतुम
२ ब. शृणुः

द्विप्रकारं[1] महाकष्टं द्वमीरितदुदात्दतम् ।।
मानसेन हि दुःखेन शरीरमुपतप्यते ।। २९

अयः पिंडेन तप्तेन कुंभसंस्थमिवोदकम् ।।
तदाशु[2] प्रतिकाराच्च सततं च विवर्जनात् ।। ३०

व्याधिराधिश्च प्रशमः क्रियायोगद्वयेन तु ।।
मानसं शमयेत्तस्माज्ज्ञानेनाग्निमिवाबुना ।। ३१

प्रशांते मानसे ह्यस्य शारीरमुप शाम्यति ।।
मनसो दुःख मूलं तु स्नेह इत्युपलभ्यते ।। ३२

स्नेहाच्च सज्जनो नित्यं जन्तुर्दुःखमुपैति च ।।
स्नेहमूलानि दुःखानि स्नेहजानि भयानि च ।। ३३

शोकहर्षौ तथायासः सर्वं स्नेहात्प्रवर्तते ।। ३४

स्नेहात्करणरागश्च प्रजज्ञे वैषयस्तथा ।।
[3]अश्रेयस्कावुभावेतौ पूर्वस्तत्र गुरुः स्मृतः ।। ३५

---

१ क. द्वैप्रकारं
२ अ. तदाश्रु
३ ब. अस्नेहस्का

त्यागी[1] तस्मान्न दुःखी स्यान्निर्वैरो निरवग्रहः ।।
अत्यागी जन्ममरणे प्राप्नोतीह पुनः पुनः ।। ३६

तस्मात्स्नेहं न लिप्सेत मित्रेभ्यो धनसंचयात् ।।
स्वशरीरसमुत्थं च ज्ञानेन विनिवर्तयेत् ।। ३७

ज्ञानान्वितेषु सिद्धेषु शास्त्रज्ञेषु कृतात्मसु ।।
न तेषु सज्जते स्नेहः पद्मपत्रेष्विवोदकम् ।। ३८

रागाभिभूतः पुरुषः कामेन परिकृष्यते ।।
इच्छा[2] संजायते चास्य ततस्तृष्णा प्रवर्धते ।। ३९

तृष्णा हि सर्वपापिष्ठा नित्योद्वेगकरी मता ।।
अधर्मबहुला चैव घोररूपानुबंधिनी ।। ४०

या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः[3] ।।
यासौ प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखम् ।। ४१

अनाद्यंता तु सा तृष्णा ह्यंतर्देहगता नृणाम् ।।
विनाशयति संभूता लोहं लोहमलो यथा ।। ४२

---

१ ब. योगी
२ ब. इच्छं
३ भ. प्रतौ 'जीर्यतः' नास्ति ।

यथैवैधः समुत्थेन वह्निना नाशमृच्छति ।।
तथा ऽकृतात्मा लोभेन स्वोत्पन्नेन विनश्यति ।। ४३

तस्माल्लोभो न कर्तव्यः शरीरे चात्मबंधुषु ।।
प्राप्तेषु वा न त्द्रुष्येत नाशे वापि न शोचयत् ।। ४४

नंदभद्र [1]उवाच ।।
अहोबाल न बालस्त्वं मतो मे त्वां नमाम्यहम् ।।
त्वद्वाक्यैरति तृप्तो ऽहं त्वां तु प्रक्ष्यामि किंचन ।। ४५

कामक्रोधावहंकारिमिंद्रियाणि च मानवाः ।।
वनिंदंति तत्र मे नित्यं विवक्षेयं प्रजायते ।। ४६

अहमेष[2] ममेदं च कार्यमीदशकस्त्वहम् ।।
इत्यादि चात्मविज्ञानमहंकार इति स्मृतः ।। ४७

परिहार्यः[3] स चेत्तं च विनोन्मत्तः प्रकीर्त्यते ।।
कामे ऽभिलाष इत्युक्तः स चेत्पुसां विवर्ज्यते ।। ४८

कथं स्वर्गो मुमुक्षा वा साध्यते दक्षदा यथा ।।
क्रोधो वा[4] यदि संत्याज्यस्ततः शत्रुक्षयः कथम् ।। ४९

---

१ अ. प्रतौ 'उवाच' नास्ति ।
२ अ. प्रतौ अहमेष लुप्तम् ।
३ ब. परिहार्थे
४ ब. प्रतौ नास्ति ।

बाह्यानामांतराणां वा विना तं तृणवद्भिदुः ।।
इंद्रियाणि निगृह्यैव दुष्टानीति निपीडयेत् ।। ५०

कथं स्याद्धर्मश्रवणं कथं वा जीवनं भवेत् ।।
एतस्मिन्मे मनो विद्धं खिद्यते[1] ज्ञान संकटे ।। ५१

तथा कस्मादिदं सृष्टं जडं विश्वं चिदात्मना ।।
एवं यद्बहुधा क्लेशैः पीडयते हा कृतस्त्विदम् ।। ५२

बाल उवाच ।।[2]
सम्यगेतद्यथा पृष्ठं यत्र मुह्यंति जंतवः ।।
श्रृण्वेकाग्रमना भूत्वा ज्ञातं द्वैपायनान्मया ।। ५३

प्रकृतिः पुरुषश्चैव अनादी श्रृणुमः पुरा ।।
साधर्म्येणावतिष्ठेते सृष्टेः प्रागजरामरौ ।। ५४

ततः कालस्वभावाभ्यां प्रेरिता प्रकृतिः पुरा ।।
पुंसः संयोगमैच्छत्सा तदभावात्प्रकुप्यत ।। ५५

ततस्तमोमयी सा च लीलया देववीक्षिता ।।
राजसी समभूद्दृष्टा सात्त्विकी समजायत्[3] ।। ५६

---

१ अ. सिद्यते

२ अ. बालोवाच ।। ब. बालक उ० ।।

३ ब. समजायते

एवं त्रिगुणतां याता प्रकृतिर्देवं दर्शनात् ।।
तां समास्थाय परमस्त्रिमूर्तिः समजायत ।। ५७

तस्याः प्रोच्चारणार्थं च प्रवृतः स्वांशतस्ततः ।।
असूयत महत्तत्वं त्रिगुणं तद्विदुर्बुधाः ।। ५८

अहंकारस्ततो जातः सत्त्वराजसतामसः ।।
तमो रजस्त्वमापद्य रजः सत्वगुणं नयेत् ।। ५९

शुद्धसत्वे[1] ततो मोक्षं प्रवदंति मनीषिणः ।।
तमसो रजसस्तस्मात्संशुद्धयर्थं च सर्वशः[2] ।। ६०

जीवात्मसंज्ञान्स्वीयांशान् त्यभजत्परमेश्वरः ।।
तावंतस्ते च क्षेत्रज्ञा देहा यावंत एव हि ।। ६१

निःसरंति[3] यथा लोहात्तप्तल्लिंगात्स्फुलिंगकाः ।।
तन्मात्र भूत सर्गोयमहंकारात्तु तामसात् ।। ६२

इंद्रियाणां सात्त्विकाच्च त्रिगुणानि च तान्यपि ।।
एतैः[4] संसिद्धयंत्रेण सच्चिदानन्दवीक्षणात् ।। ६३

---

१ अ. शुद्ध
२ अ. सर्वथा । ब. सर्वदा
३ अ. ~~सरन्ति~~ सारंति
४ ब. एते

रजस्तमश्च शोध्यंते सत्त्वेनैव मुमुक्षुभिः ।।
तस्मात्कामं च क्रोधं च इंद्रियाणां प्रवर्तनम् ।। ६४

अहंकारं च संसेव्य सात्त्विकीं सिद्धिमश्नुते ।।
राजसास्तामसाश्चैव त्याज्याः कामादयस्त्वमी ।। ६५

सात्त्विकाः सर्वदा सेव्याः संसार विजिगीषुभिः ।।
गुणत्रयस्य वक्ष्यामि संक्षेपाल्लक्षणं तव ।। ६६

शास्त्राभ्यासस्ततो ज्ञानं शौचमिंद्रियनिग्रहः ।।
धर्मक्रियात्मचिंता च सात्त्विकं गुणलक्षणम् ।। ६७

अन्यायेन धनादानं तंद्री[१] नास्ति क्यमेव च ।।
क्रौर्यं च याचकाद्यं च तामसं गुण लक्षणम् ।। ६८

तस्माद्वृद्धि मुखैस्त्वेतैः सात्त्विकैर्देवतां भजेत् ।।
राजसैर्मानिवर्त्यं च तामसैः[२] स्थाणु योनितां ।। ६९

बुद्ध्याद्यैरेव मुक्तिः स्यादितरैश्चैव च यातना ।। ७०

---

१ ब. तंत्री
२ ब. तामसै

अमीषां चाप्यभावे वै न किंचिदुपपद्यते ।।
क्लादौ हि क्लादीनां सुवर्णं शोधयेद्य था ।। ७१

तथा रजस्तमश्चैव संशोध्ये सात्त्विकैर्गुणैः ।।
अस्मादेव गुणानां च समवायादनादिजात् ।। ७२

सुखिनो दुःखिनश्चैव प्राणिनः शास्त्र दर्शिनः ।।
अष्टाविंशतिलक्षै गुणमेकमीश्वरः ।। ७३

व्यभजच्चतुरा शीतिलक्षास्ता जीवयोनयः ।।
स काशान्मनसस्तद्वदात्मनः प्रभवंति हि ।। ७४

ईश्वरां शाश्च ते सर्वे मोहिताः प्राकृतैर्गुणैः[2] ।।
क्लेशानाशादयंत्येव यथैवाधिकृता विभोः ।। ७५

अन्नानां पयसां चापि जीवानां चाथ श्रेयसे ।।
मानुष्यमाहुस्तत्त्वज्ञाः शिवभावेन भावितम् ।। ७६

नंदभद्र [3]उवाच ।।
एवमेतत्किं तु भूयः प्रक्ष्याम्येतन्महामते ।।
ईश्वराः सर्वदातारः पूज्यंते येश्च देवताः ।। ७७

---

१ अ. दिवान्
२ अ. प्रकृतैर्गुणैः ब. प्रकृति गुणैः
३ अ. 'उवाच' नास्ति ।

स्वभक्तांस्तान्न दुःखेभ्यः कस्माद्रक्षति मानवान् ॥
विशेषात्केपि दृश्यंते दुःखमग्नाः सुरान्रताः[1] ॥ ७८

इति मे मुह्यते बुद्धिस्त्वं वा किं बाल मन्यसे ॥ ७९

बाल उवाच ॥[2]
अशुचिश्च शुचिश्चापि देवभक्तो द्विधा स्मृतः[3] ॥
कर्मणा मनसा वाचा तद्गतो भक्त उच्यते ॥ ८०

अशुचिर्देवताश्चैव यदा पूजयते नरः ॥
तदा भूतान्यथा विशंति स च मुह्यति तत्क्षणात् ॥ ८१

विमूढश्चाप्य कार्याणि तानि तानि निषेवते ॥
ततो विनश्यति क्षिप्रं नाशुचिः पूजयेत्ततः ॥ ८२

तस्य पूर्वकृतं व्यक्तं कर्मणां कोटि मुच्यते ॥
महेश्वरो ब्रह्महत्याभयाद्यत्र ततस्ततः ॥ ८३

सस्नौ[4] तीर्थेषु कस्माच्च इतरो मुच्यते कथम् ॥
अम्बरीषसुतां हृत्वा पर्वतान्नारदात्तथा ॥ ८४

---

१ अ. सुरान् रताः

२ अ. बालक ॥ ब. बालक उ० ॥

३ ब. स्मृताः

४ अ. तस्नौ । ब. तस्तौ

सीतापहारमापेदे रामो ऽन्योमुच्यते कथम् ।।
ब्रह्मापि शिरसश्छेदं कामयित्वा सुतामगात् ।। ८५

इंद्रचंद्र रवि विष्णु प्रमुखाः प्राप्नुयुः कृतम् ।।
तस्माद वश्यं च कृतं भोज्यमेत नरैः सदा ।। ८६

मुच्यते को ऽपि स्वकृतान्नैवेति श्रुति निर्णयः ।।
किं तु देवप्रसादेन लभ्यमेकं सुर व्रतैः ।। ८७

बहुभिर्जन्मभिर्भोज्यं भुज्यैतैकेन जन्मना ।।
तच्च भुक्तात तस्त्वर्थो भवेदिति विनिश्चयः ।। ८८

ये तप्यंति गतैः पापैः शुचयो देवताव्रताः ।।
इह ते पुत्र पौत्रैश्च मोदंते ऽमुत्र चेह च ।। ८९

तस्माद्देवाः[1] सदा पूज्याः शुचिभिः[2] श्रद्धयान्वितै ।।
प्रकृतिः शोधनीया च स्ववर्णादितकर्मभिः ।। ९०

स्वनुष्ठितो ऽपि धर्मः स्यात्क्लेशायैव विना शिवं ।।
दुराचारस्य[3] देवोपि प्राहेति भगवान्हरः ।। ९१

---

१ ब. देवा
२ अ. शुचिभि
३ अ. दुराचरस्य

भोक्तव्यं स्वकृतं तस्मात्पूजनीयः सदाशिवः ।।
स्वाचारेण परित्याज्यौ रागद्वेषाविदं परम् ।। १२

नन्दभद्र [1]उवाच ।।
[2]शुद्धप्रज्ञ किमेतच्च पापिनोऽपि नरा यदा ।।
मोदमानाः प्रदृश्यन्ते दारैरपि धनैरपि ।। १३

बाल [3]उवाच ।।
व्यक्तं ~~तैस्तम~~- तैस्तमसा दत्तं दानं पूर्वेषु जन्मसु ।।
रजसा पूजितः शंभुस्तत्प्राप्तं स्वकृतं चतैः ।। १४

किं तु यत्तमसा कर्म कृतं तस्य प्रभावतः ।।
धर्म्ये न रतिर्भूयात्त तस्तेषां विदां वर ।। १५

~~किं तु~~ भुक्तवा पुण्यफलं याति नरकं नात्र संशयः[4] ।।
अस्मिन्नर्थे संशये प्रोक्तं मार्कंडे येन श्रूयते ।। १६

इहैवैकस्य नामुत्र अमुत्रैकस्य नो इह ।।
इह चामुत्र चैकस्य नामुत्रैकस्य नो इह ।। १७

पूर्वोपात्तं भवेत्पुण्यं भुक्तिर्नैवार्जयन्त्यपि ।।
इह भोगः स वै प्रोक्तो दुर्भगस्याल्पमेधसः ।। १८

---

१ अ. 'उवाच' नास्ति ।

२ अ. शुद्ध

३ अ. 'उवाच' नास्ति ।

४ अ. प्रती नास्ति ।

पूर्वोपात्तं यस्य नास्ति तपोभिश्चार्जयत्यपि ।।
परलोके तस्य भोगो धीमतः स क्रियात्स्फुटम् ।। ९९

पूर्वोपात्तं यस्य नास्ति पुण्यं चेहापि नार्जयेत् ।।
ततश्चेहामुत्र वापि भोक्ति भुक्तं च नराधमम् ।। १००

इति ज्ञात्वा महाभागत्यक्त्वा शल्यानि कृत्स्नशः ।।
भज रुद्रं वर्णधर्मं पालयास्मात्परं न हि ।। १०१

यो हि नष्टेष्वभीष्टेषु प्राप्तेष्वपि च शोचति ।।
तृप्येत वा भवेद्वन्धो निश्चितं सोऽन्यजन्मनः ।। १०२

नन्दभद्र उवाच[1] ।।
नमस्तुभ्यमबालाय बालरूपाय धीमते ।।
को भवांस्तत्त्वतो वेत्तुमिच्छामि त्वां शुचिस्मितम्[2]।। १०३

बहवोऽपि मया वृद्धा द्रष्टाश्चोपासिताः सदा ।।
तेषामीदशका बुद्धिर्न द्रष्टा न श्रुता मया ।। १०४

येन मे जन्म संदेहा नाशिता लीलयैव च ।।
तस्मात्सामान्यरूपस्त्वं निश्चितं न मतं मम ।। १०५

---

१ अ. प्रतौ उवाच नास्ति ।
२ ब. ... .स्मिते

बाल उवाच ।।[१]

महदेतत्समाख्येनमेकाग्रः शृणु तत्त्वतः ।।
इतः सप्ताधिके चापि सप्तमे जन्मनि त्वहम् ।। १०६

वैदिशे नगरे विप्रो नाम्नाऽऽसं धर्मजालिकः ।।
वेदवेदांगतत्त्वज्ञः स्मृतिशास्त्रार्थ विद्वरः ।। १०७

व्याख्याता धर्मशास्त्राणां यथा साक्षाद्बृहस्पतिः ।।
किं त्वहं विविधान्धर्मांल्लोकानां वर्णये भृशम् ।। १०८

स्वयं चातिदुराचारः पापिनामपि पापराट्[२] ।।
मांसाशी मद्यसेवी च परदा[३]रस्तः सदा ।। १०९

असत्यभाषी दम्भी च सदा धर्मध्वजी खलः ।।
लोभी दुरात्मा कथको न कर्ता कर्हिचित्क्वचित् ।। ११०

यस्माज्जालिकवज्जालं लोकेभ्योऽहं क्षिपामि च ।।
तत्त्वज्ञा मां ततः प्राहुर्धर्मजालिक इत्युत ।। १११

सोऽहं तैर्बहुभिः श्रीणैः पातकैरंत आगते ।।
मृतो गतो यमस्थानं पातितः कूटशाल्मलीम् ।। ११२

---

१ अ. प्रतौ 'बालः' इति स्यात् ।
ब. बाल उ० ।।
२ ब. पारयन्
३ ब. ..... रतिः

यमदूतैस्ततः कृष्टः स्मार्यमाणः स्वचेष्टितम् ।।
बहुगैश्च कृत्यमानोऽहं जीवामि प्रम्रियामि च ।। ११३

आत्मानं बहुधा निर्दह्याश्ववतीन्यर्ववर्षं समाः ।।
नरके या मतिर्भूयाद्धर्मं प्रति प्रपीडतः[1] ।। ११४

सा चेन्मुहूर्तमात्रं स्यादपि धन्यस्ततः पुमान् ।।
नमोनमः कर्मभूम्यै सुकृतं दुष्कृतं च वा ।। ११५

यस्यां मुहूर्त मात्रेण युगैरपि न नश्यति ।।
ततो विपश्चिज्जनको मोक्षयामास नारकात् ।। ११६

तैः[2] सहाहं प्रमुक्तश्च कथंचिदवपीडितः ।।
स्थाणुत्वमनुभूयाथ क्लेशानासाद्य भूरिशः ।। ११७

कीटो हम भवं पश्चातीरे सारस्वते शुभे[3] ।।
तत्र मार्गे सुखमिव संसुप्तोऽहं यदच्छया ।। ११८

आगच्छतो रथस्यास्य शब्दमश्रौषमुन्नतम् ।।
तं मेघनिर्नदं श्रुत्वा भीतोऽहं सहसा जवात् ।। ११९

---

१ ब. प्रपीज्यतः
२ अ. तै
३ अ. शुभे

[1]मार्गमुत्सृज्य दूरेण प्रपलायनमाचरम् ।।
एतस्मिन्नंतरे व्यासस्तत्र प्राप्तो यदच्छया ।। १२०

स मामपश्यत्तस्तं च कृपया[2] संयुतो मुनिः ।।
यन्मया सर्वलोकानां नानाधर्माः प्रकीर्तिताः[3] ।। १२१

विप्रजन्मनि तस्यैव प्रभावाद्व्यास संगमः ।।
ततः सर्वरुतज्ञो मां प्राहार्च्यः कीटभाषया ।। १२२

किमेवं नश्यते कीट कस्मान्मृत्योर्बिभेषि च ।।
अहो समुचिता भीतिर्मनुष्यस्य कुतस्तव ।। १२३

इत्युक्तो मतिमान्पूर्वं पुण्याद्व्यासं तदोचिवान् ।।
न मे भयं जगद्वंद्य मृत्योरस्मात्कथंचन ।। १२४

एतद्वेव भयं मान्य गच्छेयमधमां गतिम् ।।
अस्या अपि कुयोनेश्च संत्यन्याः कोटिशोऽधमाः ।। १२५

तासु गर्भादिकक्लेशा भीतस्त्रस्तोऽस्मि नान्यथा[4]।। १२६

---

१ अ. 'मार्गमुत्सृज्य' लुप्तम् ।
२ अ. धर्मः
३ ब. प्रकीर्तितः
४ अ. नान्यथः

व्यास उवाच ।।[१]

मा भयं कुरु सर्वाभ्यो योनिभ्यश्च चिरादिव ।।
मोक्षयिष्यामि ब्राह्मण्यं प्रापयिष्यामि निश्चितम् ।। १२७

इत्युक्तोऽहं कालियेन तं प्रणम्य जगद्गुरुम् ।।
मार्गमागत्य[२] चक्रेण पीडितो मृत्युमागमम् ।। १२८

ततः काकशृगालादि योनिष्वस्मि सदा भवम् ।।
तदा तदा समागम्य व्यासो मां स्मारयच्च तत् ।। १२९

ततो बहुविधा योनीः परिक्रम्यास्मि कर्षितः ।।
ब्राह्मणस्य च गेहस्यां योनौ जातोऽतिदुःखितः ।। १३०

ततो जन्म प्रभृत्यस्मि पितृभ्यां परिवर्जितकः ।।
गलत्कुष्ठी महापीडामितां योऽनुभवामि च ।। १३१

ततो मां पंचमे वर्षे व्यास आगत्य जप्तवान् ।।
कर्णे सारस्वतं मंत्रं तेनाहं संस्मरामि च ।। १३२

अनधीतानि शास्त्राणि वेदान्धर्मांश्च कृत्स्नसः ।।
उक्तं व्यासेन चेदं मे गच्छ क्षेत्रं गृहस्य[३] च ।।
तत्र त्वं नंदभद्रं च आश्वासय महामतिम् ।। १३३

---

१ अ. व्यास ।। ब. व्यास उ० ।।
२ अ. माचरं
३ अ. गुहस्य

त्यक्त्वा बहुदेके प्राणान स्थितोर्प महीजले ।।
काराप्य त्वं ततो भावी मैत्रेय इति सन्मुनिः ।। १३४

गमिष्यसि ततो मोक्षमिति मां व्यास उक्तवान् ।।
आगतश्च ततश्चात्र वाहीकेभ्यो ति कष्टलेशतः ।। १३५

इति ते कथितं सर्वमात्मनश्चरितं मया ।।
पाममेवं विधं नष्टे[1] नंदभद्र सदा त्यज[2] ।। १३६

नंदभद्र [3]उवाच ।।
अहो महाद्भुतं तुभ्यं चरितं येन मे त्वदि ।।
भूयः शतगुणं जातं धर्माय द्रढ मानसम् ।। १३७

किं तु त्वयोक्तधर्मस्य कर्तुकामोस्मि निष्कृतिम् ।।
धर्मं स्मर भवांस्तस्मात्किं चिदादिश निश्चितम् ।। १३८

बाल उवाच ।।[4]
अत्र तीर्थे च सप्ताहं निराहारस्त्वहं स्थितः ।।
सूर्यमंत्राज्जपिष्यामि त्यक्ष्यामि च ततस्त्व सून् ।। १३९

ततो बर्करिका तीर्थे दग्धव्योहं त्वया तटे ।।
अस्थीनि सागरे चापि मम क्षेप्याणि[5] चात्र हि ।। १४०

---

१ अ. ब. कष्टं
२ ब. त्यजः ।।
३ अ. प्रतौ बे उवाच नास्ति ।
४ अ. बाल ।। ब. बाल उवा० ।।
५ अ. क. क्षेप्यानि

यदि सापह्नवं चित्तं मइयतीव तवास्तिचेत् ।।
ततस्त्वां गुरुकार्यार्थमादेक्ष्यामि श्रृणुष्व तत् ।। १४१

अस्मिन्बहूदके तीर्थे यत्र प्राणांस्त्यजाम्यहम् ।।
तत्र मन्नामचिह्नस्ते संस्थाप्यो भास्करो विभुः ।। १४२

आरोग्यं धनधान्यं च पुत्रदारादि संपदः ।।
भास्करो भगवांस्तुष्टो दद्यादेतच्छ्रुतेर्वचः ।। १४३

सविता परमो देवः[१] सर्वस्वं वा द्विजन्मनाम् ।।
वेदवेदांग गीतश्च त्वमप्येनं सदा भज ।। १४४

बहूदकमिदं कुंडं संसेव्यं च[२] सदा त्वया ।।
माहात्म्यमस्य वक्ष्यामि संक्षेपाद्व्यास सूचितम् ।। १४५

बहूदके कुंडवरे स्नाति यो विधिवन्नरः ।।
आरोग्यं धनधान्याद्यं तस्य स्यात्सर्वजन्मसु ।। १४६

बहूदके च यः स्नात्वा सप्तम्यां माघमासके ।।
दद्यात्पिंडं पितृणां चैतेक्षयां तृप्तिमाप्नुयुः ।। *३ १४७

---

१ ब. देव

२ ब. प्रतौ 'च' नास्ति ।

*३ अ. प्रतौ श्लोकांकाः १४७-१५३ न सन्ति ।

बहूदकस्य तीरे यः शुचिर्यजति वै क्रतुम् ।।
शत क्रतुफलं तस्य नास्ति नाचिद्विचारणा ।। १४८

अत्र यस्त्यजति प्राणान्बहूदक तटे नरः[1] ।।
मोदते सूर्यलोके/सौ धर्मिणां च सुतो भवेत् ।। १४९

बहूदकस्य तीरे च यः कुर्याज्जिप साधनम् ।।
सर्वं लक्षगुणं प्रोक्त श्च जपो होमश्च पूजनम् ।। १५०

बहूदकस्य तीरे च द्विजमेकं च भोजयेत् ।।
यो मिष्टान्नेन तस्य स्याद्विप्रकोटिश्च भोजिता ।। १५१

बहूदकस्य तीरे या नारी गौरिण्विकाः शुभाः[2] ।।
संभोजयति तस्याश्च कुर्यात्सुस्वागतं ह्युमा ।। १५२

बहूदकस्य तीरे च यः कुर्याद्योग साधनम् ।।
षाण्मासाभ्यन्तरे सिद्धिर्भवेत्तस्य न संशयः ।। १५३

बहूदकस्य तीरे च प्रेतानुदिश्य दीयते[3] ।।
यत्किंचिद क्षयं तेषामुपतिष्ठेन्न चान्यथा ।। १५४

---

१ अ. नर

२ अ. शुभाः

३ ब. दियते।

स्नानं दानं जपो होमः[1] स्वाध्यायः पितृतर्पणम् ।।
कृतं बहूदके तटे सर्वं स्यात्सुमहत्फलम् ।। १५५

त्वयैतद्धृदि संधार्यं फलं व्यासेन सूचितम् ।।
बहूदकस्य कुंडस्य नंदभद्र महामते ।। १५६

इत्युक्त्वा सोऽभवन्मौनी स्नात्वा कुंडे ततः शुचिः ।।
तीरे प्रस्तरमाश्रित्य स्वयं मंत्राञ्जजापह ।। १५७

श्रीनारद उवाच ।।[2]
ततः स सप्तरात्रांति जहौ बालो[3] निजानसून ।।
संस्कारिता यथोक्तं च नंदभद्रेण ब्राह्मणैः ।। १५८

यत्र बालः स च प्राणांजहौ जप परायणः ।।
बालादित्यमिति ख्यातं तत्रास्थापयत प्रभुम्[4] ।। १५९

बहूदके च यः स्नात्वा बालादित्यं प्रपूजयेत् ।।
तस्य स्याद्भास्करस्तुष्टो मोक्षोपायं च विंदति ।। १६०

नंदभद्रोऽप्यथान्यस्यां भार्यायामपरान्सुतान् ।।
उत्पाद्यात्म समान्धीमांश्छिव सूर्यपरायणः ।। १६१

---

१ ब. होम
२ अ. श्री नारद ।। ब. नारद उ० ।।
३ ब. बाली
४ अ. प्रभुः ।। ब. प्रभु ।।

रुद्रदेहं ययौ पार्थ पुनरावृत्ति दुर्लभम् ।।
एवमेतन्महाकुंडं बहुदकमिति स्मृतम् ।। १६२

अस्य तीरे स्वर्मशं च वल्लीनाथः प्रमोक्ष्यति ।।
दत्तात्रेमस्य यो योगी ह्यवतारो भविष्यति ।। १६३

अर्चयित्वा च तं देव योगसिद्धिमवाप्नुयात् ।।
पशूनामृद्धिमाप्नोति गोशरण्यो ह्यसौ प्रभुः ।। १६४

पश्चिमायां बुधसुतस्तथा क्षेत्रे[१] स भारत ।।
पुरुरवादित्यमिति स्थापयामास पार्थिवः ।। १६५

सर्वकाम प्रदश्चासौ भद्रादित्यसमो रविः[२] ।।
बहुदक क्षेत्रसमं तस्य क्षेत्रे च भारत ।। १६६

अस्य तीर्थस्य[३] माहात्म्यं जप्तव्यं कर्णमूलको ।।
पुत्रस्य वापि शिष्यस्य न कथंचन नास्तिकः[४] ।। १६७

श्रृणोतीदं श्रद्धया यस्तस्य तुष्येच्च भास्करः ।।
धारयन्त्दद्ये मोक्षं मुच्यते भवसागरात् ।। १६८

*५ इति श्री स्कंदे ...... बहूदक माहात्म्य बालादित्यवृत्तान्त वर्णनं नाम – – षट्चत्वारिंशोऽध्यायः ।

---

१ अ. क्षेत्रे २ ब. रवि
३ ब. क्षेत्रस्य इति स्यात् ४ अ. नास्तिकं
*५ अ. इति श्री स्कंद पुराणे कुमारिका क्षेत्रे बहूदक माहात्म्यं ।।
ब. इति श्री स्कंद पुराणे कुमारिका खंडे बहूदक महात्म्ये अष्टचत्वारिंशो–ऽध्यायः ।।